श्री अन्नपूर्णा मंत्र स्तवः

श्री अन्नपूर्णा मंत्र स्तवः

श्री दक्षिणामूर्तिरुवाच |
अन्नपूर्णामनुं वक्ष्ये विद्याप्रत्यंगमीश्वरी |
यस्य श्रवणमात्रेण अलक्ष्मीर्नाशमाप्नुयात् || 1 ||

प्रणवं पूर्वमुच्चार्य मायां श्रियमथोच्चरेत् |
कामं नमः पदं प्रोक्तं पदं भगवतीत्यथ || 2 ||

माहेश्वरी पदं पश्चादन्नपूर्णेत्यथोच्चरेत् |
उत्तरे वह्निदयितां मंत्र एष उदीरितः || 3 ||

ऋषिः ब्रह्मास्य मंत्रस्य गायत्री छंद ईरितं |
अन्नपूर्णेश्वरीदेवी देवता प्रोच्यते बुधैः || 4 ||

मायाबीजं बीजमाहुः लक्ष्मीशक्तिरितीरिता |
कीलकं मदनं प्राहुर्मायया न्यासमाचरेत् || 5 ||

रक्तां विचित्रवासनां नवचंद्रजूटा-
-मन्नप्रदाननिरतां स्तनभारनम्रां |
अन्नप्रदाननिरतां नवहेमवस्त्रा-
-मंबां भजे कनकमौक्तिकमाल्यशोभां || 6 ||

नृत्यंतमिंदिशकलाभरणं विलोक्य
ह्यष्टां भजे भगवतीं भवदुःखहंत्रीं |
आदाय दक्षिणकरेण सुवर्णदर्पं
दुग्धान्नपूर्णमितरेण च रत्नपात्रं || 7 ||

एवं ध्यात्वा महादेवीं लक्षमेकं जपेन्मनुं |
दशांशमन्नं जुहुयान्मंत्रसिद्धिर्भविष्यति || 8 ||

एवं सिद्धस्य मंत्रस्य प्रयोगाच्छृणु पार्वति |
लक्षमेकं जपेन्मंत्रं सहस्रैकं हविर्हुनेत् || 9 ||

महतीं श्रियमाप्नोति कुबेरत्रयसन्निभां |
जप्त्वैकलक्षं मंत्रज्ञो हुनेदन्नं दशांशकं || 10 ||

तत्कुलेन्नसमृद्धिस्स्यादक्षय्यं नात्र संशयः |
अन्नं स्पृष्ट्वा जपेन्मंत्रं नित्यं वारचतुष्टयं || 11 ||

अन्नराशिमवाप्नोति स्वमलव्यापिनीमपि |
सहस्रं प्रजपेद्यस्तु मंत्रमेतं नरोत्तमः || 12

इह भोगान्यथाकामान्भुक्त्वांते मुक्तिमाप्नुयात् |
कुले न जायते तस्य दारिद्र्यं कलहावळिः || 13 ||

न कदाचिदवाप्नोति दारिद्र्यं परमेश्वरि |
पलाशपुष्पैर्हवनमयुतं यस्समाचरेत् || 14 ||

स लब्ध्वा महतीं कांतिं वशीकुर्याज्जगत्रयं |
पयसा हवनं मर्त्यो य आचरति काळिकः || 15 ||

तद्गेहे पशुवृद्धिस्स्याद्गावश्च बहुदुग्धदाः |
एवं मंत्रं जपेन्मर्त्यो न कदाचिल्लभेद्भयं || 16 ||

असौख्यमश्रियं दुःखं संशयो नात्र विद्यते |
हविष्येण हुनेद्यस्तु नियुतं मानवोत्तमः || 17 ||

सर्वान्कामानवाप्नोति दुर्लभानप्यसंशयः |
अन्नपूर्णाप्रयोगोयमुक्तो भक्तेष्टदायकः |
किमन्यदिच्छसि श्रोतुं भूयो मे वद पार्वति || 18 ||

इति श्रीमहात्रिपुरसिद्धांते अन्नपूर्णा मंत्रस्तवः |